CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मिथ्यात्वस्य	सम्यक्त्वात्पतितानाम्	भव्यानां	साद्यप्राप्तानाम्	अभ०	प्रथमसम्यक्त्वस्य लाभे .०	सादित्वात्	उत्कृष्टोदीरणातः पतितानां मिथ्या०	परावृत्तित्वात्	उ० संक्लेशेन मिथ्यादृशाम्	परावृत्तित्वात्
ज्ञा० ५–दर्श० ४-विघ्न ५ नाम् (१४)	——	,,	सादेरभावात्	,,	१२ मे .०	विच्छेदत्वात्	,,	,,	,,	,,
तैज० ७-वर्णादि २०–स्थि०–अस्थि०–शुभ–अशुभ–अगु०–निर्माणानाम् (३३)	— —	,,	,,	,,	१३ मान्ते	,,	,,	,,	,,	,,
शेषाणाम् ११०	अध्रुवोदीरणत्वात्	अध्रु०	—	—	अध्रु०	अध्रु०	अध्रु०	अध्रु०	अध्रु०	अध्रु०

.० =समयाधिकावलिकाशेषे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कम्मट्ठितीए जहण्णा ठितीउदीरणा। सा य सादिय अधुवा। तं मोत्तुण सेसा सव्वा अजहण्णठितिउदीरणा। तम्हा अजहण्णस्स आदि णत्थि, धुवउदीरणत्तादेव। धुवाधुवा पुव्वुत्ता। णामंमि जे तेत्तीसं धुवोदया तेसिं सजोगिचरिमसमए जहण्णा ठितिउदीरणा, सा य सादिय अधुवा। तं मोत्तुण सेसा सव्वा अजहण्णा ठिती-उदीरणा विग्घावरणं व णेयव्वा। 'सेस विगप्पा दुविह'त्ति—एतेसिं चेव अट्ठचत्तालीसाए कम्माणं, सेसविगप्पत्ति उक्कोसअणुक्कोसजहण्णा, एतेसिं ठितिउदीरणा सादिय अधुवा। उक्कोसा ठितिउदीरणा मिच्छद्दिट्ठिम्मि लब्भतित्ति काउं। अणुक्कोसा वि तंमि चेव ठिति(ए समयन्तरे,) तम्हा सादिय अधुवा। 'सव्वविगप्पा य से-साणं'ति—'सव्व विगप्पा य' इति उक्कोसाणुक्कोसजहण्णाजहण्णा, सेसाणंति सेसकम्माणं धुवोदीरणवज्जाणं दसूत्तरस्स पगतिसतस्स ठितीउदीरणा साइयअधुवा अधुवोदयत्तादेव लब्भति। सादि अणादिपरूवणा गता ॥३१॥

(मलय०)—तदेवं कृता मूलप्रकृतिविषया साद्यनादिप्ररूपणा, सम्प्रत्युत्तरप्रकृतिविषयां तां चिकीर्षुराह—'मिच्छत्तस्स' त्ति। मिथ्या-त्वस्याजघन्या स्थित्युदीरणा चतुर्विधा, तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च। तत्र मिथ्यादृष्टेः प्रथमसम्यक्त्वमुत्पादयतो मिथ्यात्वस्य प्रथमस्थितौ समयाधिकावलिकाशेषायां जघन्या स्थित्युदीरणा सादिरध्रुवा च। सम्यक्त्वाच्च प्रतिपततोऽजघन्या। सा च सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवे अभव्यभव्यापेक्षया। तथा ध्रुवोदीरणानां पञ्चविधज्ञानावरणचक्षुरचक्षुरवधिकेवलदर्शनावरणप-ञ्चविधान्तरायतैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणाख्यानामजघन्या स्थित्युदीरणा त्रिधा। तद्यथा—अनादिर्ध्रुवा-ऽध्रुवा च। तथाहि—ज्ञानावरणपञ्चकान्तरायपञ्चकचक्षुरचक्षुरवधिकेवलदर्शनावरणरूपाणां चतुर्दशप्रकृतीनां क्षीणकषायस्य स्वगुणस्थानकस-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मयाधिकावलिकाशेषे वर्तमानस्य जघन्या स्थित्युदीरणा, सा च सादिरध्रुवा च । शेषा सर्वाप्यजघन्या । सा चानादिः, सदैव भावात् । ध्रुवाध्रुवे पूर्ववत् । तैजससप्तकादीनां च त्रयस्त्रिंशत्संख्याकानां नामप्रकृतीनां जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये । सा च सादिरध्रुवा च । ततोऽन्या सर्वाप्यजघन्या, सा चानादिः । ध्रुवाध्रुवे पूर्ववत् । एतासामेव मिथ्यात्वादिप्रकृतीनामष्टचत्वारिंशत्संख्याकानां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा द्विप्रकाराः, तद्यथा–सादयोऽध्रुवाश्च । तथाहि–एतासामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टे संक्लेशे वर्तमानस्य कियत्कालं लभ्यते । ततः समयान्तरे तस्याप्यनुत्कृष्टा । ततो द्वे अपि साद्यध्रुवे । जघन्या च प्रागेव भाविता । 'सव्वविगप्पा य सेसाणं' ति–शेषाणां शेषप्रकृतीनां दशोत्तरशतसंख्यानां सर्वे विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपा द्विविधाः, तद्यथा–सादयोऽध्रुवाश्च । साद्यध्रुवत्वं चाध्रुवोदयत्वाद्भावनीयमिति ॥३१॥

(उ०)—तदेवं कृता मूलप्रकृतिविषया साद्यनादिप्ररूपणा, अथोत्तरप्रकृतिविषयां तां चिकीर्षुराह—मिथ्यात्वस्याजघन्या स्थित्युदीरणा चतुर्धा–साद्यनादिध्रुवाध्रुवभेदात् । तत्र मिथ्यादृष्टेराद्यसम्यक्त्वमुत्पादयतो मिथ्यात्वस्याद्यस्थितौ समयाधिकावलिकाशेषायां जघन्या स्थित्युदीरणा, सा च सादिरध्रुवा च । सम्यक्त्वाच्च पततोऽजघन्या, सा च सादिः, तत्स्थानमप्राप्तस्यानादिः, ध्रुवाध्रुवे अभव्यभव्यापेक्षया । तथा ध्रुवोदीरणानां ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकतैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणाख्यानामजघन्या स्थित्युदीरणा त्रिधा–अनादिध्रुवाध्रुवभेदात् । तथाहि–ज्ञानावरणान्तरायपञ्चकदर्शनावरणचतुष्काणां क्षीणकषायस्य स्वगुणस्थाने समयाधिकावलिकाशेषे जघन्या स्थित्युदीरणा, सा च सादिरध्रुवा च । शेषा सर्वाऽप्यजघन्या, सा चानादिः, सदैव भावात् । ध्रुवाध्रुवे पूर्ववत् । तैजससप्तकादित्रयस्त्रिंशन्नामप्रकृतीनां जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सा च सादिरध्रुवा च । ततोऽन्या सर्वाऽप्यजघन्या, सा चानादिः । ध्रुवाध्रुवे प्राग्वत् । एतासामेव मिथ्यात्वाद्यष्टचत्वारिंशत्प्रकृतीनां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा द्विविधाः साद्यध्रुवभेदात्, यत एतासामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टसंक्लेशे वर्तमानस्य कियत्कालं लभ्यते, समयान्तरे च तस्याप्यनुत्कृष्टेति द्वे अप्येते साद्यध्रुवे । जघन्या तु प्रागेव भावितेति । शेषाणां दशोत्तरशतसंख्यानां सर्वे विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपा द्विविधाः साद्यध्रुवभेदात्, तथात्वं चाध्रुवोदयत्वादेव भाव्यम् ॥३१॥

इयाणिं अद्धाच्छेओ सामित्तं च दो वि भण्णंति—

अद्धाच्छेओ सामित्तं पि य ठिइसंकमे जहा नवरं । तव्वेइसु निरयगईएँ वा तिसु हिट्ठिमखिईसु ॥३२॥

(चू०)— अद्धाच्छेओ सामित्तं च जहा ठितिसंकमे भणियं तहा भाणियव्वं इह वि, तहावि अइसंखित्तंति काउं उल्लोविज्जइ । जेसिं कम्माणं बन्धुक्कस्सठिती तेसिं बन्धावलियदुगूणे ठिती उक्कोसिया ट्ठितीउदीरणे होइ । तंमि य समये सव्वट्ठितीए बन्धावलिया गया तेण आवलियूणा सव्वट्ठिती जट्ठिती । जेसिं कम्माणं संकमुक्कसा ठिती तेसिं तीयावलिगूणा सव्वट्ठिती उक्कोसिया ठितीउदीरणा होइ । तंमि समये बन्धसंकमावलियदुगूणा (जट्ठि)ती होइ । सम्मत्तसम्मामिच्छत्ताणं सत्तरिसागरोवमकोडाकोडीओ अंतोमुहुत्तूणा उक्कोसिया ठिति, ठितिउदीरणा वि उक्कोसिता तत्तिया चेव । (मिच्छत्तस्स उक्कोसट्ठितिं बंधिऊण तत्थेवअंतोमुहुत्तं ट्ठिचातओ परिवडिऊण उदीरेइत्ति) सम्मत्तस्स अंतोमुहुत्तूणा ठिती उक्कोसिया ठितीउदीरणा होइ । इदाणिं सम्मा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

लिकात्रिकहीना सर्वा स्थितिरुदीरणाप्रायोग्या तानि कर्माणि वेदयमानानां वेदितव्या । अत्र बन्धावलिकासंक्रमावलिकारहिता सर्वा स्थितिर्यत्स्थितिः, इहावलिकात्रिकरूपोऽद्धाच्छेदस्तदुदयवन्त उदीरणास्वामिनः । एवमग्रेऽपि यावान् यावानुदीरणानर्हः कालस्तावाँस्तावानद्धाच्छेदस्तदुदयवन्तश्चोदीरणास्वामिनोऽवसेयाः । तथा सप्ततिसागरोपमकोटीकोटीप्रमाणां मिथ्यादृष्टिर्मिथ्यात्वस्थितिं बद्ध्वाऽन्तर्मुहूर्त्तं यावन्मिथ्यात्व एव स्थित्वा सम्यक्त्वं प्रतिपद्यते । ततः सम्यक्त्वे सम्यग्मिथ्यात्वे चान्तर्मुहूर्त्तोनां मिथ्यात्वस्थितिं सकलामपि संक्रमयति, संक्रमावलिकायां चातीतायां तदुदीरणा प्रवर्त्तते, ततः संक्रमावलिकातिक्रमेऽपि साऽन्तर्मुहूर्त्तोनैवेति सम्यक्त्वमनुभवतः सम्यक्त्वस्यान्तर्मुहूर्त्तोना सप्ततिसागरोपमकोटाकोटीप्रमाणोत्कृष्टा स्थितिरुदीरणायोग्या । ततः कश्चित्सम्यक्त्वेऽप्यन्तर्मुहूर्त्तं स्थित्वा सम्यग्मिथ्यात्वं गच्छति । ततः सम्यग्मिथ्यात्वमनुभवतः सम्यग्मिथ्यात्वस्यान्तर्मुहूर्त्तद्विकोना सप्ततिसागरोपमकोटाकोटिप्रमाणोत्कृष्टा स्थितिरुदीरणायोग्या । उक्तं च—"[1]अंतोमुहुत्तहीणा सम्मे मीसम्मि दोहिं मिच्छस्स" । मिथ्यात्वस्योत्कृष्टस्थितिरन्तर्मुहूर्त्तोना सम्यक्त्वे, मिश्रे च द्वाभ्यामन्तर्मुहूर्त्ताभ्यामूनोदीरणायोग्येत्येतदक्षरार्थः । तथाऽऽहारकसप्तकं स्वयोग्योत्कृष्टसंक्लेशेनाप्रमत्तेन सतोत्कृष्टस्थितिकं बद्ध्वा तत्कालोत्कृष्टस्थितिकस्वमूलप्रकृत्यभिन्नप्रकृत्यन्तरदलिकं च तत्र संक्रमय्य सर्वोत्कृष्टान्तःसागरोपमकोटाकोटिस्थितिकं करोति । ततो बन्धानन्तरमन्तर्मुहूर्त्तमतिक्रम्याहारकशरीरं कर्तुमुद्यतते, तच्च कुर्वन् लब्ध्युपजीवनौत्सुक्यभावेन प्रमादं भजते, ततस्तस्य प्रमत्तस्य सत आहारकशरीरं कुर्वत आहारकसप्तकस्यान्तर्मुहूर्त्तोनोत्कृष्टा स्थितिरुदीरणायोग्या । अत्र प्रमत्तस्याहारकशरीरारम्भकत्वादुत्कृष्टस्थित्युदीरणास्वामी प्रमत्तसंयत एव द्रष्टव्यः । अवशिष्टप्रकृतीनां सूत्रकृदेव विशेषमाचष्टे—'निरयगईइ वा त्ति'

---

१ पञ्चसंग्रह उदीरणाकरण गा० २९

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

उदीरणायामद्धाच्छेदस्य चित्राणि ।



Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

सम्यक्त्वस्योदीरणायत्स्थितिः आवलिकाधिकान्तर्मुहूर्त्तन्यून ७० को० को० सा० प्रमाणा

सम्यक्त्वस्यलता (मिथ्या० संक्रमेण) अन्तर्मु० हीना ७० को० को० प्रमाणा	00000 संक्रमा०	00000 उदयाव०	0000000000000000000000000 सम्यक्त्वस्य उदीरणाप्रायोग्याः स्थितयः +द्व्यावलिकाधिकान्तर्मुहूर्त्त-न्यून ७० को० को० सा० प्रमाणाः

(अद्धाच्छेदः) २ आव० न्यूनान्तर्मु०

मिश्रस्य लता (सम्यक्त्वसंक्रमेण) अन्तर्मुहूर्त्तहीन ७० को० को० सागरप्रमाणा.	0000000000 अन्तर्मुहूर्त्त (सम्यक्त्वोदय-कालीनं)	00000 उदयावलि०	000000000000000000000000 उदीरणप्रा० स्थितयः (+आवलिकाधिकान्तर्मुहूर्त्त-द्व्योन७०कोडाकोडीसागरप्रमाणाः)

अद्धाच्छेदः आवलिकाधिकान्तर्मुहूर्त्तम्

इति पद्धत्या शेषाणामपि अद्धाच्छेदः स्वयमभ्यूह्यः

+ग्रन्थकारेणोदयवलिकासत्कावलिकाधिकत्वं न कथितं पर पद्धत्तिक्रमेणावलिकाधिकत्वग्रहणमावश्यकम्

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इत्यादि। नरकगतेरपिशब्दान्नरकानुपूर्व्याश्च तिर्यक्पञ्चेन्द्रियो मनुष्यो वोत्कृष्टां स्थितिं बद्ध्वोत्कृष्टस्थितिबन्धानन्तरं चान्तर्मुहूर्त्ते व्यतीते तिसृष्वधस्तनपृथिवीषु मध्येऽन्यतरस्यां समुत्पत्स्यते, तस्य प्रथमसमये नरकगतेरन्तर्मुहूर्त्तहीना सर्वाऽपि स्थितिर्विंशतिसागरोपमकोटाकोटीमानोदीरणायोग्या भवति। नरकानुपूर्व्याश्चान्तरालगतौ समयत्रयं यावदुत्कृष्टा स्थितिरुदीरणायोग्या। इह नरकगत्यादीनामुत्कृष्टा स्थितिः कृष्णलेश्यापरिणामेनैव बध्यते, तदुपेतश्च कालं कृत्वा नरकेषूत्पद्यमानो जघन्यादिभावेन पञ्चमपृथिव्यादित्रय एवोत्पद्यत इतीहाधस्तनपृथिवीत्रयग्रहणप्रयोजनम् ॥३२॥

देवगतिदेवमणुयाणुपुव्विआयावविगलसुहुमतिगे। अंतोमुहुत्तभग्गा तावइ ऊणं तदुक्कस्सं ॥३३॥

(चू०)—देवगति देवाणुपुव्वी विगलतिगजाती सुहुमअपज्जत्तसाहारणेणं एतेसिं णवण्हं कंमाणं अंतोमुहुत्तूणा उक्कोसिया ठितीउदीरणा भवति। कम्हा? जम्हा जो जत्थ (उ)ववज्जइ सो तप्पाउग्गं पगतिं अंतोमुहुत्तं बन्धिऊणं उववज्जतित्ति एतासिं पगतीणं उक्कोसिया ठिती ठितीसंकमा लब्भति तम्हा अंतोमुहुत्तूणाणि दरिसव्वं। जहा असुभपरिणामवड्ढि वीससागरोवमकोडाकोडी बितिया णिरयगति बद्धा। ततो बन्धावसाणे तप्पाउग्गसंकिलिट्ठपरिणामो दससागरोवमकोडाकोडीठितीयं देवगति बन्धित्तुमाढत्तो। ततो देवगतिं बन्धमाणस्स णिरयगती बज्झमाणपगतिं संकमतित्ति काउं देवगतीए संकमति। सो अंतोमुहुत्तं बन्धिऊण कालगतो देवलोएसु उववण्णो ताव णिरयगतीबन्धकालस्स अंतोमुहुत्तो अतीतो। ततो देवलोएसु उववण्णस्स देवगती उव्वट्टिज्जति ताहे णिरयगतिठितिए वि देवगतिठितिए संकामियाए ठितीउदीरणा लब्भति। एवं अंतोमुहुत्तोणा लब्भइ। ॥५२॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

'अंतोमुहुत्तभग्गा' इति–उक्कोसट्ठितिबन्धज्झवसाणातो जो परिवडितो सो भग्गोत्ति वुच्चति। 'तावति ऊणं तदुक्कस्सं' ति–एतासिं ठिती वीसं सागरोवमकोडाकोडीतो आवलिऊण संकमे लब्भइ। सा ताव अंतोमुहूत्तूणा भवति। बन्धकालअंतोमुहूत्तेण ऊणा तिसिं कम्माणं उक्कोसा ठितीउदीरणा भवति। आयावणामाए वि, आयवणामाए बंधुक्कस्सा एव उक्कोसट्ठिती, जहा देवो उक्कोससंकिलेससंकिलिट्ठो एगिंदियपातोग्गाणं पगतीणं उक्कोसठिति बन्धमाणो बायरपुढविकाएसु उववण्णो। ततो सरीरपज्जत्तीए पज्जत्तस्स आयावणामाए उक्कोसट्ठितीउदीरणा भवति। सा वि ठिति पुव्वलद्धातो अंतोमुहुत्तूणा भवति ॥२३॥

(मलय०)–'देवगति'त्ति। देवगतिदेवानुपूर्वीमनुष्यानुपूर्वीगामातपस्य विकलत्रिकस्य–द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिरूपस्य सूक्ष्मत्रिकस्य च–सूक्ष्मसाधारणापर्याप्तकलक्षणस्य स्वस्वोदये वर्तमाना अन्तर्मुहूर्तभग्नाः–उत्कृष्टस्थितिबन्धाध्यवसायादन्तरमन्तर्मुहूर्तं कालं यावत् परिभ्रष्टाः सन्तस्तावदूनाम्–अन्तर्मुहूर्तोनां तदुत्कृष्टां–देवगत्यादीनामुत्कृष्टां स्थितिमुदीरयन्ति। इयमत्र भावना–इह कश्चित्तथाविधपरिणामविशेषभावतो नरकगतेरुत्कृष्टां स्थितिं विंशतिसागरोपमकोटीकोटीप्रमाणां बद्ध्वा ततः शुभपरिणामविशेषभावतो देवगतेरुत्कृष्टां स्थितिं दशसागरोपमकोटीकोटीप्रमाणां बद्धुमारभते। ततस्तस्यां देवगतिस्थितौ बध्यमानायामावलिकाया उपरि बन्धावलिकाहीनामावलिकात उपरितनीं सर्वामपि नरकगतिस्थितिं संक्रमयति। ततो देवगतेरपि विंशतिसागरोपमकोटीकोटीप्रमाणा स्थितिरावलिकामात्रहीना जाता। देवगतिं च बध्नन् जघन्येनाप्यन्तर्मुहूर्तं कालं यावद्बध्नाति। बन्धानन्तरं च कालं कृत्वाऽनन्तरसमये देवो जातः। ततस्तस्य देवत्वमनुभवतो देवगतेरन्तर्मुहूर्तोना विंशतिसागरोपमकोटीकोटीप्रमाणा उत्कृष्टा स्थितिरुदीरणायोग्या भवति। ननूक्तयुक्त्या नुसारेणावलिका-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

ऽधिकान्तर्मुहूर्तोनेति प्राप्नोति कथमुच्यतेऽन्तर्मुहूर्तोनेति ? नैष दोषः, यत आवलिकाप्रक्षेपेऽपि तदन्तर्मुहूर्तमेव, केवलं बृहत्तरमवगन्तव्यमिति । एवं देवानुपूर्व्या अपि वाच्यम् । तथा कश्चिन्नरकानुपूर्व्या उत्कृष्टां स्थितिं विंशतिसागरोपमकोटीकोटीप्रमाणां बद्ध्वा ततः शुभपरिणामविशेषतो मनुष्यानुपूर्व्या उत्कृष्टां स्थितिं पञ्चदशसागरोपमकोटीकोटीप्रमाणां बद्धुमारभते। ततस्तस्यां मनुष्यानुपूर्वीस्थितौ बध्यमानायामावलिकाया उपरि बन्धावलिकाहीनामावलिकात उपरितनीं सकलामपि नरकानुपूर्वीस्थितिं संक्रमयति। ततो मनुष्यानुपूर्व्या अपि विंशतिसागरोपमकोटीकोटीप्रमाणा स्थितिरावलिकामात्रहीना जाता । मनुष्यानुपूर्वीं च बध्नन् जघन्येनाप्यन्तर्मुहूर्तं कालं यावद्बध्नाति, तच्चान्तर्मुहूर्तमावलिकोनविंशतिसागरोपमकोटीकोट्यास्त्रुट्यति । बन्धानन्तरं च कालं कृत्वा मनुष्यानुपूर्वीमनुभवतस्तस्या उत्कृष्टा स्थितिरन्तर्मुहूर्तोना विंशतिसागरोपमकोटीकोटीप्रमाणा उदीरणायोग्या। ननु मनुष्यगतेरपि पञ्चदशसागरोपमकोटीकोट्यो बन्धेनोत्कृष्टा स्थितिः प्राप्यते, तथा मनुष्यानुपूर्व्या अपि, न त्वेकस्या अपि विंशतिः । तत उभे अपि संक्रमोत्कृष्टे, संक्रमोत्कृष्टत्वाविशेषे च कथं मनुष्यगतेरिव मनुष्यानुपूर्व्या अपि आवलिकात्रिकहीनोत्कृष्टा स्थितिरुदीरणायोग्या न भवति ? तदयुक्तं, मनुष्यानुपूर्व्या अनुदयसंक्रमोत्कृष्टत्वात् । तदुक्तं—“[1]मणुयाणुपुव्वि मीसग-आहारग-देवजुयल-विगलाणि । सुहुमातितिगं-तित्थं अणुदयसंकमणुक्कोसा ॥ ” अनुदयसंक्रमोत्कृष्टानां च जघन्यतोऽप्यन्तर्मुहूर्तोनाया एवोत्कृष्टस्थितेरुदीरणायोग्यत्वात् । मनुष्यगतिस्तूदयसंक्रमोत्कृष्टा । तदुक्तं— “[2]मणुगइ सायं सम्मं थिर हासाइछ वेय सुभखगई । रिसभचउरंसगाईपणुच्चुदयसंकमुक्कोसा ॥” ततस्तस्या आवलिकात्रिकहीनैवोत्कृष्टा स्थितिरुदीरणायोग्या भवतीति । एवमातपादीनामप्यन्तर्मुहूर्तोना उत्कृष्टा स्थितिरुदीरणायोग्या भावनीया । नन्वनुदयसंक्रमोत्कृष्टस्थि-

१ पञ्चसंग्रह बन्धव्यद्वार गा० ६३ २ गा० ६२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तीनां प्रकृतीनामन्तर्मुहूर्तोना उत्कृष्टा स्थितिरुदीरणायोग्या भवतु, आतपनाम तु बन्धोत्कृष्टं ततस्तस्य बन्धोदयावलिकाद्विकरहितैवोत्कृष्टा स्थितिरुदीरणाप्रायोग्या प्राप्नोति, कथमुच्यतेऽन्तर्मुहूर्तोनेति ? उच्यते–इह देव एवोत्कृष्टे संक्लेशे वर्तमान एकेन्द्रियप्रायोग्याणामातपस्थावरैकेन्द्रियजातीनामुत्कृष्टां स्थितिं बध्नाति, नान्यः। स च तां बद्ध्वा तत्रैव देवभवेऽन्तर्मुहूर्तं कालं यावदवतिष्ठते। ततः कालं कृत्वा बादरपृथ्वीकायिकेषु मध्ये समुत्पद्यते। समुत्पन्नः सन् शरीरपर्याप्त्या पर्याप्त आतपनामोदये वर्तमानस्तदुदीरयति। तत एवं सति तस्यान्तर्मुहूर्तोनैवोत्कृष्टा स्थितिरुदीरणायोग्या भवति। आतपग्रहणं चोपलक्षणम्। तेनान्यासामपि स्थावरैकेन्द्रियजातिनरकद्विकतिर्यग्द्विकौदारिकसप्तकान्त्यसंहनननिद्रापञ्चकरूपाणामेकोनविंशतिसंख्याकानामनुदयबन्धोत्कृष्टानामन्तर्मुहूर्तोना उत्कृष्टा स्थितिरुदीरणायोग्या वेदितव्या। तत्र स्थावरैकेन्द्रियजातिनरकद्विकानां भावना कृता। शेषाणां क्रियते–तत्र नारकः तिर्यग्द्विकौदारिकसप्तकान्त्यसंहनननामुत्कृष्टां स्थितिं बद्ध्वा ततो मध्यमपरिणामः सन् तत्रैवान्तर्मुहूर्तं स्थित्वा तिर्यक्षूत्पन्न उत्कृष्टामुदीरणां करोति। निद्रापञ्चकस्याप्युदये उत्कृष्टां स्थितिमुत्कृष्टेन संक्लेशेन बद्ध्वा ततोऽन्तर्मुहूर्ते गते सति निद्रोदये उत्कृष्टामुदीरणां करोति ॥३३॥

(उ०)—देवगतिदेवानुपूर्वीमनुष्यानुपूर्वीणामातपस्य विकलत्रिकस्य द्वित्रिचतुरिन्द्रियजातिरूपस्य सूक्ष्मत्रिकस्य च सूक्ष्मापर्याप्तसाधारणस्य स्वस्वोदये वर्त्तमाना अन्तर्मुहूर्त्तभग्नाः–उत्कृष्टस्थितिबन्धाध्यवसायानन्तरमन्तर्मुहूर्त्तमात्रव्यवधानभाज इत्यर्थः, तावदूनामन्तर्मुहूर्त्तोनां तदुत्कृष्टां–देवगत्यादीनामुत्कृष्टां स्थितिमुदीरयन्ति। अत्रेयं भावना–इह कश्चित्परिणामविशेषेण नरकगतेरुत्कृष्टां स्थितिं विंशतिसागरोपमकोटाकोटिप्रमाणां बद्ध्वा ततः शुभपरिणामविशेषसंपत्त्या देवगतेरुत्कृष्टां स्थितिं दशसागरोपमकोटीकोटीप्रमाणां बद्धुमारभते, तस्यां देवगतिस्थितौ बध्यमानायां स्वबन्धकालरूपावलिकाया उपरि बन्धावलिकाहीनामुपरितनीं सर्वामपि नरकगति-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थितिं संक्रमयति, ततो देवगतेरपि विंशतिसागरोपमकोटीकोटीप्रमाणा स्थितिरावलिकामात्रहीना जायते, देवगतिं च बध्नन् जघन्येनाप्यन्तर्मुहूर्त्तं यावद्बध्नाति, बन्धानन्तरं च कालं कृत्वाऽनन्तरसमये देवो जातः, देवत्वं चानुभवतस्तस्य देवगतेरन्तर्मुहूर्त्तोना विंशतिसागरोपमकोटाकोटीप्रमाणोत्कृष्टस्थितिरुदीरणायोग्या भवति, आवलिकाद्विकान्तर्मुहूर्त्तोनत्वेऽप्यावलिकाप्रक्षेपकृतबृहत्तरान्तर्मुहूर्त्तोनत्वमविरुद्धमेवेति नावलिकोनत्वमपि पृथग्गृहीतम्, एवं देवानुपूर्व्या अपि वाच्यम्। तथा कश्चित्संक्लेशविशेषेण नरकानुपूर्व्या उत्कृष्टां स्थितिं विंशतिसागरोपमकोटाकोटीप्रमाणां बद्ध्वा ततः शुभपरिणामविशेषेण मनुष्यानुपूर्व्या उत्कृष्टां स्थितिं पञ्चदशसागरोपम कोटाकोटीमानां बद्धुमारभते, तस्यां मनुष्यानुपूर्वीस्थितौ बध्यमानायामावलिकात उपरितनीं बन्धावलिकाहीनां सकलामपि नरकानुपूर्वीस्थितिं संक्रमयति, ततो मनुष्यानुपूर्व्या अपि स्थितिरावलिकामात्रहीनविंशतिसागरोपमकोटाकोटिप्रमाणा जाता। मनुष्यानुपूर्वीं च बध्नन् जघन्येनाप्यन्तर्मुहूर्त्तं यावद्बध्नाति, तच्चान्तर्मुहूर्त्तं संक्रमलब्धोत्कृष्टस्थितेस्त्रुटयति, ततो बन्धानन्तरं कालं कृत्वा मनुष्यानुपूर्वीमनुभवतस्तस्या उत्कृष्टस्थितिरन्तर्मुहूर्त्तोनविंशतिसागरोपमकोटाकोटिप्रमाणोदीरणायोग्या। ननु मनुष्यगतिमनुष्यानुपूर्व्योरुभयोरपि बन्धेन पञ्चदशसागरोपमकोटीकोटय उत्कृष्टा स्थितिः प्राप्यते, न त्वेकस्या अपि विंशतिः, तत उभयोरपि संक्रमोत्कृष्टत्वाविशेषात् कथं मनुष्यगतेरिव मनुष्यापूर्व्या अपि नावलिकात्रिकहीनोत्कृष्टा स्थितिरुदीरणायोग्येष्यते इति चेत्?, नैवं, मनुष्यानुपूर्व्या अनुदयसंक्रमोत्कृष्टत्वात्, अनुदयसंक्रमोत्कृष्टानां च जघन्यतोऽप्यन्तर्मुहूर्त्तोनाया एवोत्कृष्टस्थितेरुदीरणायोग्यत्वात्, मनुष्यगतेस्तूदयसंक्रमोत्कृष्टत्वेन तस्या आवलिकात्रिकहीनोत्कृष्टस्थितेरेवोदीरणायोग्यत्वसंभवात्। एवमातपादीनामप्यन्तर्मुहूर्त्तोनोत्कृष्टस्थितेरुदीरणायोग्यत्वं भावनीयम्। नन्वनुदयसंक्रमोत्कृष्टस्थितिप्रकृतीनामन्तर्मुहूर्त्तोना भवतूत्कृष्टस्थितिरुदीरणायोग्या, आत-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पनाम्नस्तु बन्धोत्कृष्टत्वेन बन्धोदयावलिकाद्विकरहितैवोत्कृष्टस्थितिरुदीरणायोग्या भवतीति कथमुच्यतेऽन्तर्मुहूर्त्तोनेति ? उच्यते, इह देव एवोत्कृष्टसंक्लेशवानेकेन्द्रियैकयोग्यानामातपस्थावरैकेन्द्रियजातीनामुत्कृष्टां स्थितिं बध्नाति, नान्यः, स च तां बद्ध्वा तत्रैव देवभवेऽन्तर्मुहूर्त्तं यावत्तिष्ठति, ततः कालं कृत्वा बादरपृथ्वीकायिकेषूत्पद्य शरीरपर्याप्त्या पर्याप्तः सन्नातपनामोदये वर्तमानस्तदुदीरयति, ततस्तस्यैवमन्तर्मुहूर्त्तहीनैवोत्कृष्टस्थितिरुदीरणायोग्या भवतीति। आतपग्रहणं चोपलक्षणं, तेनान्यासामपि स्थावरैकेन्द्रियजातिनरकद्विकतिर्यग्द्विकौदारिकसप्तकान्त्यसंहननिद्रापञ्चकरूपाणामेकोनविंशतिप्रकृतीनामनुदये बन्धोत्कृष्टानामन्तर्मुहूर्त्तोनोत्कृष्टस्थितिरुदीरणायोग्या ज्ञातव्या। तत्र स्थावरैकेन्द्रियजातिनरकद्विकानां भावना जातैव, शेषाणां क्रियते—तत्र नारकस्तिर्यग्द्विकौदारिकसप्तकान्त्यसंहननानामुत्कृष्टां स्थितिं बद्ध्वा ततो मध्यमपरिणामः सँस्तत्रैवान्तर्मुहूर्तं स्थित्वा तिर्यक्षूत्पन्न उत्कृष्टामुदीरणां करोति, निद्रापञ्चकस्य चानुदये उत्कृष्टसंक्लेशेनोत्कृष्टस्थितिं बद्ध्वा ततोऽन्तर्मुहूर्त्तात्यये निद्रोदये उत्कृष्टामुदीरणां करोतीति ॥३३॥

तित्थयरस्स य पल्लासंखिज्जइमे जहन्नगे इत्तो। थावरजहन्नसंतेण समं अहिगं व बंधंतो ॥३४॥

गंतूणावलिमित्तं कसायबारसगभयदुगंच्छाणं। निद्दाइपंचगस्स य आयावुज्जोयनामस्स ॥३५॥

(चू०)—तित्थगरणामाए खवियसेसाए पलितोवमस्स असंखेज्जभागमेत्ता ठिती सजोगिपढमसमए चेव उक्कोसिया ठितीउदीरणा होति। उक्कोससामित्तं भणियं॥

इयाणिं जहण्णसामित्तं भण्णइ—'जहण्णगे एत्तो'। जहण्णट्ठितीउदीरणासामित्तं भण्णइ। 'थावरजहण्णसंतेण

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समं अहिगं व बंधंतो'त्ति। एगिंदियस्स सव्वखुड्डगं सत्तं, थावरजहण्णसंतेण समं, समं णाम सरिसं, ततो तुल्लं वा, अहियं वा बन्धमाणो 'गंतूणावलियमित्तो'त्ति–एगिंदियपातोग्गे सव्वजहण्णे संतकम्मे जाए आवलियमेत्तं गंतूण 'कसायबारसगभयदुगंछाणं णिद्दातिपंचगस्सयआतावुज्जोवणामस्स'-संजलणवज्जा बारस वि कसाया भय दुगंच्छा णिद्दापणगं आयावउज्जोवं एतेसिं एक्कवीसाए कम्माणं सो चेव एगिंदियउ जहन्नियं ठितिउदीरणं करेति। कहं ? भण्णइ–बारसकसाय(भय)दुगंछाणं णिद्दापणगाणं च धुवबन्धित्ताउ खुड्डगयरा ठिति ण लब्भति। आयावुज्जोवाणं ठिति पडिवक्खस्स अभावातो ततो अण्णा जहण्णा ण लब्भतित्ति ॥३४–३५॥

(मलय०)—'तित्थयरस्स'त्ति। इह पूर्वं तीर्थकरनाम्नः स्थितिं शुभैरध्यवसायैरपवर्त्यापवर्त्य पल्योपमासंख्येयभागमात्रा शेषीकृता। ततोऽनन्तरसमये उत्पन्नकेवलज्ञानः सन् तामुदीरयति। उदीरयतश्च प्रथमसमये उत्कृष्टोदीरणा। सर्वदैव चेयन्मात्रैव स्थितिरुत्कृष्टा तीर्थकरनाम्न उदीरणाप्रायोग्या प्राप्यते, नाधिकेति। तदेवमुक्तमुत्कृष्टस्थित्युदीरणास्वामित्वम्। सम्प्रति जघन्यस्थित्युदीरणास्वामित्वमाह–'जहन्नगे इत्तो'। इत ऊर्ध्वं जघन्ये–जघन्यस्थित्युदीरणायां स्वामित्वमभिधीयते। प्रतिज्ञातमेव निर्वाहयति–'थावर'इत्यादि। स्थावरस्य सतो यज्जघन्यं–सर्वस्तोकं स्थितिसत्कर्म तेन सममधिकं वा मनाग्मात्रेणाभिनवं कर्म स एव सर्वजघन्यस्थितिकर्मा स्थावर एकेन्द्रियो बध्नन् बन्धावलिकां गत्वा–बन्धावलिकायामतीतायामित्यर्थः, आद्यद्वादशकषायभयजुगुप्सानिद्रापञ्चकातपोद्योतनाम्नामेकविंशतिप्रकृतीनां जघन्यां स्थित्युदीरणां करोति। इहातपोद्योतवर्जानामेकोनविंशतिप्रकृतीनां ध्रुवबन्धित्वादातपोद्योतयोस्तु प्रतिपक्षाभावात् अन्यत्र जघन्यतरा स्थितिर्न प्राप्यते, तत एकेन्द्रिय एव यथोक्तस्वरूप आसां प्रकृतीनां जघन्यस्थित्युदीरणास्वामी ॥३४–३५॥ ॥'९५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(उ०)—तीर्थंकरस्य पूर्वं शुभैरध्यवसायैरपवर्त्यापवर्त्य शेषीकृते पल्योपमासंख्येयभागमात्रे सयोगिकेवलिनः प्रथमसमये उत्कृष्टोदीरणा प्रवर्तते, सर्वदैवोत्कर्षतोऽपीयन्मात्रैव स्थितिरुदीरणायोग्या तीर्थंकरनाम्नः प्राप्यते, नाधिका, उक्तं च—"[1]हयसेसा तित्थठिई पल्लासंखिज्जमित्तिया जाया। तीसे सजोगिपढमे समए उदीरणुक्कोसा॥" आयुषां तु चतुर्णामपि स्वस्वोत्कृष्टस्थितिबन्धादूर्ध्वमुदयाद्यसमये उत्कृष्टा स्थित्युदीरणा। तदेवमभिहितमुत्कृष्टस्थित्युदीरणास्वामित्वम्, अथ जघन्यस्थित्युदीरणास्वामित्वनिरूपणं प्रतिजानीते—'जहन्नगे इत्तो'। इतः—ऊर्ध्वं 'जघन्ये'—जघन्यस्थित्युदीरणायां स्वामित्वमभिधीयते। प्रतिज्ञातमेवाह—'स्थावर'इत्यादि। स्थावरस्य सतो यज्जघन्यमतिहीनं 'सदिति'—स्थितिसत्कर्म तेन सममीषन्मात्रेणाधिकं वाऽभिनवं कर्म बध्नन् स एव सर्वजघन्यस्थितिसत्कर्मा स्थावरो बन्धावलिकां गत्वा—बन्धावलिकायां व्यतीतायामित्यर्थः, आद्यद्वादशकषायभयजुगुप्सानिद्रापञ्चकातपोद्योतनाम्नामेकविंशतिप्रकृतीनां जघन्यां स्थित्युदीरणां करोति। इहातपोद्योतरहितानामेकोनविंशतिप्रकृतीनां ध्रुवबन्धित्वादातपोद्योतयोस्त्वप्रतिपक्षत्वात्प्रकारान्तरेणान्यत्र जघन्यतरस्थित्युदीरणाया अप्राप्तेर्यथोक्तस्वरूप एकेन्द्रिय एवासां प्रकृतीनां जघन्यस्थित्युदीरणास्वामी प्रोक्तः॥३४–३५॥

एगिंदियजोग्गाणं इयरा बंधित्तु आलिगं गंतुं। एगिंदियागए तट्ठिइए जाईणमवि एवं ॥३६॥

(चू०)—'एगिंदियजोग्गाणं इयरा बन्धितु आलिगं गंतु'त्ति। एगिंदियस्स उदीरणाजोग्गा जे कम्मा ते एगिंदियजोग्गा, 'इयरा बन्धित्तु'त्ति—तेसिं पडिवक्खे बन्धित्तूणं अंतोमुहुत्तं ततो वेदिज्जमाणकम्मं बन्धित्तुमाढत्तस्स आवलियं गंतुत्ति—आवलियं गंतूणं, आवलियापढमसमयबद्धा लया बितीयावलियाए पढमसमए उदीरणं एति-

[1] पञ्चसंग्रह उदीरणाकरण गा० ३१

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

त्ति तम्मि समए जहन्निया ठिती उदीरणा ण लब्भति, तम्हा पढमावलियाए चेव चरिमसमए पुव्वकालबद्धस्स कम्मस्स जहण्णिया ट्ठितीउदीरणा लब्भति। के ते एगिंदियजोग्गा कम्मा? भण्णइ–एगिंदियजातीथावर-सुहुमसहारणाणि, एते[ण] एगिंदियजोग्गा। कम्मा? भण्णइ–एगिंदियजातीए जहण्णठितीसंतकम्मिगो इयराउ चत्तारि जातीतो पडिवाडीए बंधित्तु एगिंदियजाति बंधित्तुमाढत्तो, ततो बन्धपढमसमयाउ आवलियं गंतुं बन्धावलियाए चरिमसमए पुव्वबद्धा एगिंदियजातीए जहण्णियं ट्ठितिं उदीरेति। थावरसुहुमसाहारणाणं पि अप्पप्पणो पडिवक्खं बन्धिऊणं पुणो तं पगतिं बन्धिउमाढत्तो, ततो बन्धावलियाए चरिमसमए पुव्वबद्धाए एगिंदियपाउग्गाए जहण्णियाए ठितीउदीरणा लब्भति। 'एगिंदियागए तट्ठितीए जाईणमवि एवं'–एगिंदियाओ आगओ एगिंदियागओ, तंमि एगिंदियागए एगिंदियपातोग्गा जहण्णिया ट्ठितीउदीरणा लब्भति। 'जातिणमवि एवं च'त्ति–बेइंदियतेइंदियचउरिंदियजातीणं पि एवं चेव कित्तणयं होइ। एगिंदियो जहण्णगट्ठितिसंतकम्मितो तओ उवट्टित्तु बेइंदिएसु उववण्णो। तओ पुव्वगट्ठं (बद्धां)बेइंदियजाइं वेइत्तुमाढत्तो। तम्मि चेव समए एगिंदियजाइ बन्धित्तुमाढत्तो, सो सव्वमहं ति बन्धगद्धं बंधिउं तओ तेइंदियचउरिंदियपंचिंदियजाइउ एवं चेव बन्धित्तु उक्कोसं बन्धगद्धं सव्वासिं बन्धगद्धाणं अंतोमुहुत्तं, तओ बेइंदियजाइं बंधिउमाढत्तो, ततो बेइंदियजाति बन्धावलियाए चरिमसमए एगिंदियजहण्णसंतकम्माउ एवतिकालेण ऊणियाए बेइंदियजातीए जहण्णिया ट्ठितीउदीरणा। एवं तेइंदियचउरिंदियजातीणं पि भाणियव्वं ॥३६॥ ॥५६॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

समयाधिकावलिकाप्रमाणायां मिथ्यात्वस्य वेदानां च त्रयाणामपि संज्वलनानां च चतुर्णामपि सम्यक्त्वस्यापि च जघन्या स्थित्युदीरणा भवति। केवलं (मिथ्यात्वस्य सम्यक्त्वाभिमुखस्य प्रथमस्थितेः समयाधिकावलिकाशेषायां,) सम्यक्त्वसंज्वलनलोभयोः क्षये उपशमे च जघन्या स्थित्युदीरणा वाच्या, शेषाणां तु क्षपकश्रेण्यामेव। उक्तं च- 'उवसमे वि दुसु', द्वयोः—सम्यक्त्वलोभयोरुपशमे, अपिशब्दात्क्षयेऽपीत्येतदर्थः ॥३९॥

पल्लासंखियभागूणुदही एगिंदियागए मिस्से। बेसत्तभागवेउव्वियाइ पवणस्स तस्संते ॥४०॥

(चू०)—पलिओवमस्स जं असंखेज्जतिभागेण ऊणं उदधिं पल्लासंखियभागूणुदहिं तारिसेणं सम्माभिच्छत्तसंतकम्मेणं एगिंदिएहिंतो आगतो एगिंदियागओ तस्स एगिंदिएहिंतो आगयस्स जीवस्स अंतोमुहुत्तेणं सम्माभिच्छत्तं अणुदीरणापातोग्गं भवतित्ति तंमि समए सम्माभिच्छत्तं पडिवण्णस्स 'मिस्से'त्ति—सम्मामिच्छदिट्ठिस्स चरिमसमए सम्माभिच्छत्तस्स जहण्णिया ठितिउदीरणा होति, एगिंदियजहण्णठितिसंतकम्मस्स हेट्ठाउ ठिया ठिती उदीरणाए अपातोग्गा भवंति। 'वेसत्तभागवेउव्वियाइ'त्ति—बे सागरोवमस्स सत्त भागा पलिओवमस्स असंखेज्जइभागेण ऊणगा जस्स वेउव्वियस्स ठिती सा बेसत्तभागवेउव्विया वि(से), 'पवणस्स'त्ति—बादरवाउकाइयस्स, तस्स 'अंते'त्ति—किं भणियं होइ? वेउव्वियछक्कगस्स बादरवाउकाइओ बहुसो बहुसो वेऊव्विणं चरिमसमए वट्टमाणो जहण्णठितीउदीरगो। से (वि)काले अप्पाउग्गं उदीरणाए भविस्सइत्ति तंमि काले जहण्णिया ठितीउदीरणा। अप्पणो संतकम्माउ हेठातो जा ठिती सा उदीरणा जोग्गा ण भवति जउ उवलिस्सति ॥४०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(मलय०)—'पल्ल' त्ति-पल्योपमासंख्येयभागेन न्यूनं यदेकं सागरोपमं तावन्मात्रसम्यग्मिथ्यात्वस्थितिसत्कर्मा एकेन्द्रियभवादुद्धृत्य संज्ञिपञ्चेन्द्रियमध्ये समायातः। तस्य यतः समयादारभ्यान्तर्मुहूर्तानन्तरं सम्यग्मिथ्यात्वस्योदीरणाऽपगमिष्यति तस्मिन् समये सम्यग्मिथ्यात्वप्रतिपन्नस्य चरमसमये सम्यग्मिथ्यात्वस्य जघन्या स्थित्युदीरणा। एकेन्द्रियसत्कजघन्यस्थितिसत्कर्मणश्च सकाशादधो वर्तमानं सम्यग्मिथ्यात्वमुदीरणायोग्यं न भवति। तावन्मात्रस्थितिके तस्मिन्नवश्यं मिथ्यात्वोदयसंभवतस्तदुद्वलनसंभवात्। तथा यैः सप्तभिर्भागैः सागरोपमं भवति तौ द्वौ सप्तभागौ यस्य वैक्रियषट्कस्य—वैक्रियशरीरवैक्रियसंघातवैक्रियबन्धनचतुष्टयरूपस्य तत् द्विसप्तभागं वैक्रियं, ततो विशेषणसमासः, प्राकृतत्वात्स्त्रीत्वनिर्देशः, इहापि च 'पल्लासंखियभागेण' इत्यनुवर्तते, ततश्च तस्य द्विसप्तभागवैक्रियषट्कस्य पल्योपमासंख्येयभागहीनस्य पवनस्य—बादरवायुकायिकस्य तस्य—वैक्रियस्य पर्यन्तसमये जघन्या स्थित्युदीरणा। एतदुक्तं भवति—बादरवायुकायिकः पल्योपमासंख्येयभागहीनसागरोपमद्विसप्तभागप्रमाणवैक्रियषट्कजघन्यस्थितिसत्कर्मा बहुशो वैक्रियमारभ्य चरमे वैक्रियारम्भे चरमसमये वर्तमानो जघन्यां स्थित्युदीरणां करोति। अनन्तरसमये च वैक्रियषट्कमेकेन्द्रियसत्कजघन्यसत्कर्मापेक्षया स्तोकतरमिति कृत्वा उदीरणायोग्यं न भवति किन्तूद्वलनायोग्यम् ॥४०॥

(उ०)—पल्यासंख्येयभागोनोदधेः पल्योपमासंख्येयभागेन न्यूनं यदेकसागरोपमं तावन्मात्रसम्यग्मिथ्यात्वस्थितिसत्कर्मण एकेन्द्रियागतस्यैकेन्द्रियभवादुद्धृत्य संज्ञिपञ्चेन्द्रियमध्ये समायातस्य यतः समयादारभ्यान्तर्मुहूर्तानन्तरं सम्यग्मिथ्यात्वस्योदीरणा निवर्तिष्यते तस्मिन् समये सम्यग्मिथ्यात्वं प्रतिपन्नस्य चरमसमये सम्यग्मिथ्यात्वस्य जघन्या स्थित्युदीरणा, एकेन्द्रियसम्बन्धिजघन्यस्थितिसत्कर्मणः सकाशादधो वर्तमानं च सम्यग्मिथ्यात्वं नोदीरणायोग्यं, तदधस्तनस्थितिके तस्मिन् सत्यवश्यं मिथ्यात्वोदयसंभवेन तदुद्वलन- ॥६१॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्यैव सम्भवात् । तथा यैः सप्तभिर्भागैः सागरोपमं भवति तौ द्वौ सप्तभागौ स्थितिरूपौ यस्य वैक्रियस्य—वैक्रियशरीरवैक्रियसंघातवैक्रियबन्धनचतुष्टयरूपस्य वैक्रियषट्कस्य तद्द्विसप्तभागवैक्रियं, तदपि प्राक्तनानुवृत्त्या पल्योपमासंख्येयभागोनं गृह्यते, तस्य स्त्रीत्वनिर्देशः प्राकृतत्वात्, पवनस्य—बादरवायुकायिकस्य वैक्रियस्यान्ते—पर्यन्तसमये जघन्या स्थित्युदीरणा । इयमत्र भावना—बादरवायुकायिकः पल्योपमासंख्येयभागहीनसागरोपमद्विसप्तभागप्रमाणवैक्रियषट्कजघन्यस्थितिसत्कर्मा बहुशो वैक्रियं निर्माय चरमे वैक्रियारम्भे चरमसमये वर्तमानो जघन्यस्थित्युदीरणां करोति । तदनन्तरसमये च वैक्रियषट्कमेकेन्द्रियसम्बन्धिजघन्यसत्कर्मापेक्षया स्तोकतरमिति कृत्वोदीरणायोग्यं न भवति, किं तूद्वलनायोग्यम् ॥४०॥

चउरुवसमेत्तु पेज्जं पच्छा मिच्छं खवेत्तु तेत्तीसा । उक्कोससंजमद्धा अंते सुतणूउवंगाणं ॥४१॥

(चू०)—'पेज्जं'—मोहं, तं चत्तारि वारे उवसामइत्तु 'पच्छा मिच्छत्तं खवेत्तु'त्ति—चत्तारि वारे उवसामित्तु पच्छा मिच्छत्तादिदंसणमोहं खवेत्तु 'तेत्तीसा' इति—ततो उक्कोसठितिगेसु देवेसु तेतीसं सागरोवमादीं जीविय ततो चुतो मणूसो जातो अठवासितो संजमं पडिवण्णो 'उक्कोससंजमद्धा अंते'त्ति—पुव्वकोडिं देसूणं संजमं अणुपालेत्तु तस्स अंते आहारगसरीरी जातो तस्स अंते 'सुतणूउवंगाणं'ति—सुतणुत्ति आहारसरीरं, ताए चेव अंगोवंगं, एएसिं सपरिवाराणं जहण्णिया ठितिउदीरणा । किं कारणं? संतकम्मं पत्तियं कालं हेट्ठातो खयं जातित्ति किच्चा ॥४१॥

(मलय०)—'चउ'त्ति । संसारपरिभ्रमणेन चतुरो वारान् प्रेम—मोहनीयमुपशमय्य ततो मिथ्यात्वं, उपलक्षणमेतत्, सम्यक्त्वं सम्यग्मिथ्यात्वं च क्षपितं, क्षपयित्वा च त्रयस्त्रिंशत्सागरोपमस्थितिको देवो जातः । ततो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नः । ततो

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

वर्षाष्टकानन्तरं संयमं प्रतिपन्नोऽप्रमत्तभावे चाहारकसप्तकं बद्धवान् । ततो देशोनां पूर्वकोटिं यावत्संयमं परिपालितवान् । ततो देशोन-पूर्वकोटिपर्यन्ते आहारकशरीरं कृत्वा–'सुतणु'त्ति–आहारकशरीरं, 'उवंग'त्ति–आहारकाङ्गोपाङ्गं, बहुवचनादाहारकबन्धनचतुष्टयाहारक-सङ्घातपरिग्रहः, तेषां जघन्यां स्थित्युदीरणां करोति । इह मोहोपशमं कुर्वन् शेषनामकर्मप्रकृतीनां घातादिभिः प्रभूतं स्थितिसत्कर्म घातयति । देवभवे चापवर्तनाकरणेनापवर्तयति । तत आहारकसप्तकबन्धकाले स्तोकमेव स्थितिसत्कर्म संक्रमयतीति चतुष्कृत्वो मोहा-दिग्रहणम् । आहारकसप्तकस्थितिसत्कर्म च देशोनपूर्वकोटिप्रमाणेन कालेन प्रभूतं क्षयमुपयाति ततो देशोनपूर्वकोट्युपादानम् ॥४१॥

(उ०)—बहुशो भवभ्रमणेन चतुरो वारान् 'पेज्जं'ति–मोहनीयमुपशमय्य ततः पश्चान्मिथ्यात्वमुपलक्षणात्सम्यक्त्वं सम्यग्मिथ्यात्वं च क्षपयित्वा, 'तेत्तीस'त्ति सर्वार्थसिद्धे त्रयस्त्रिंशत्सागरोपमस्थितिको देवो जातः, ततो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नः, ततो वर्षाष्टकानन्तरमुत्कृष्टाद्धां–देशोनां पूर्वकोटिं यावत्संयममनुपालितवान्, ततोऽन्ते देशोनपूर्वकोटिपर्यन्ते आहारकशरीरं कृत्वा सुतनोरा-हारकशरीरस्य, तथोपाङ्गानामाहारकोपाङ्गानां, बहुवचनादाहारकबन्धनचतुष्टयाहारकसंघातग्रहः, एतस्याहारकसप्तकस्य जघन्यां स्थित्यु-दीरणां करोति । इह मोहोपशमं कुर्वन् शेषनामप्रकृतीनां स्थितिघातादिभिः प्रभूतं स्थितिसत्कर्म घातयति, देवभवे चापवर्तनाकरणेना-पवर्तयति, तत आहारकसप्तकबन्धकाले स्तोकमेव स्थितिसत्कर्म तत्र संक्रामतीति चतुष्कृत्वो मोहोपशमस्योत्कृष्टस्थितिकदेवभवस्य च ग्रहणं, देशोनपूर्वकोटिप्रमाणेन चारित्रकालेन चाहारकसप्तकस्थितिसत्कर्म प्रभूतं क्षयमुपयातीति देशोनपूर्वकोट्युपादानम् ॥४१॥

छउमत्थखीणरागे चउदस समयाहिगालिगठिईए । सेसाणुदीरणंते भिन्नमुहुत्तो ठिईकालो ॥४२॥

(चू०)—'छउमत्थखीणरागे'त्ति–खीणकसायत्ति 'चउदस समयाहियावलियठितिए'–णाणावरणदंसणावरण-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

चउक्कं पंचण्हमंतराइयाणं एतासिं चोदसण्हं कम्माणं समयाहियावलियसेसाए ठितिए जहण्णिया ठितिउदीरणा भवति। 'सेसाणुदीरणंते भिण्णमुहुत्तो ठिइकालो'त्ति–सेसाणं पगतीणं उदीरणंते, के ? भण्णइ–मणुयगति पंचिदियजाति उरालियसत्तगं छसंठाण पढमसंघयणं उवघायं परघायं उस्सासं पसत्थापसत्थविहायगति तसं बायरं पज्जत्तगं पत्तेयसरीरं सुभगं सुसरं दुसरं आएज्जं जसं तित्थकरं उच्चागोयं एत्ताओ बत्तीसं, धुवोदीरणातेतीससहितातो पण्णट्ठि होति, एतासिं 'उदीरणंते'त्ति–सजोगिकेवलिचरिमसमए जहण्णिया ट्ठितिउदीरणा होइ। तीसे जहण्णगट्ठितीए किं पमाणं ? भण्णइ–'भिण्णमुहुत्तो'–अंतोमुहुत्तोत्ति जं भणियं होइ। आउगाणं पि उदीरणांतवयणातो सिद्धं अप्पप्पणो उदीरणंते जहण्णिता ट्ठितीउदीरणा भवतित्ति ॥४२॥

(मलय०)—'छउमत्थ' त्ति–छद्मस्थक्षीणरागस्य पञ्चविधज्ञानावरणचक्षुरचक्षुरवधिकेवलदर्शनावरणपञ्चविधान्तरायलक्षणानां चतुर्दशप्रकृतीनां समयाधिकावलिकाशेषायां स्थितौ जघन्या स्थित्युदीरणा। शेषाणां च प्रकृतीनां मनुजगतिपञ्चेन्द्रियजातिप्रथमसंहननौदारिकसप्तकसंस्थानषट्कोपघातपराघातोच्छ्वासप्रशस्ताप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकसुभगसुस्वरादेययशःकीर्तितीर्थकरोच्चैर्गोत्रदुःस्वरलक्षणानां द्वात्रिंशत्प्रकृतीनां, पूर्वोक्तानां च नामध्रुवोदीरणानां त्रयस्त्रिंशत्प्रकृतीनां, सर्वसंख्यया पञ्चषष्टिसंख्यानां सयोगिकेवलिचरमसमये जघन्या स्थित्युदीरणा। तस्याश्च जघन्यायाः कालो भिन्नमुहूर्तोऽन्तर्मुहूर्त्तमित्यर्थः। आयुषामप्युदीरणान्ते जघन्या स्थित्युदीरणा ॥४२॥

(उ०)—छद्मस्थक्षीणरागस्य ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकलक्षणानां चतुर्दशप्रकृतीनां समयाधिकावलिकाशेषायां

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्थितौ जघन्या स्थित्युदीरणा । शेषाणां च मनुजगतिपञ्चेन्द्रियजात्याद्यसंहननौदारिकसप्तकसंस्थानषट्कोपघातपराघातोच्छ्वासविहायोगतिद्विकत्रसचतुष्कसुभगचतुष्कतीर्थकरोच्चैर्गोत्रदुःस्वररूपाणां द्वात्रिंशत्प्रकृतीनां प्रागुक्तानां नामध्रुवोदीरणानां च त्रयस्त्रिंशत्प्रकृतीनां सर्वसङ्ख्यया पञ्चषष्टिप्रकृतीनां सयोगिकेवलिचरमसमये जघन्या स्थित्युदीरणा । तस्याश्च स्थितिकालो भिन्नमुहूर्त्तमन्तर्मुहूर्त्तमित्यर्थः । आयुषामप्युदीरणान्ते जघन्या स्थित्युदीरणा द्रष्टव्या ॥४२॥

भणिया ठ्ठिती उदीरणा । इयाणिं अणुभागुदीरणा भण्णत्ति। तीसे इमे अत्थाहिगारा, तंजहा–सण्णा, सुभासुभपरूवणा, विपागपरुवणा, पच्चयपरुवणा, सादिय अणाइयपरूवणा, सामित्तमिति । सण्णासुभासुभविपागणिरूवणत्थं भण्णति—

अणुभागुदीरणाए सन्ना य सुभासुभा विवागो य । अणुभागबंधभणिया नाणत्तं पच्चया चेमे ॥४३॥

(चू०)—अणुभागुदीरणाए सण्णाए भेदा–ट्ठाणसण्णा घातिसण्णा य । ट्ठाणसण्णा चउव्विहा, तंजहा–चउठाणिका, तिठाणिका, बिठाणिका, एगट्ठाणिका य । घातिसण्णा तिविहा–सव्वघाती, देसघाती, अघाती सण्णा य। 'सुभासुभा' इति–पसत्थकम्माण अणुभागो सुभो, अपसत्थकम्माणं अणुभागो असुभो । 'विवागो य'त्ति–विवागो चउव्विहो, तंजहा–पोग्गलविवागो, खेत्तविवागो, भवविवागो, जीवविवागो य । एतेसिं परूवणा 'अणुभागबन्धभणिय'त्ति–बंधसयगस्स अणुभागबन्धे भणिया तहेव भाणियव्वा। 'णाणत्तं पच्चया चेमे'त्ति–णाणत्तं विसेसो जं तहिं ण भणियं तं भण्णइ, भणियस्स य विसेसो य भण्णइ, 'पच्चया चेमे'त्ति–तत्थ बन्धं

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पडुच्च पच्चया भणिया, इह उदीरणं पडुच्च पच्चया भण्णंति ॥४३॥

(मलय०)—तदेवमुक्ता स्थित्युदीरणा, सम्प्रत्यनुभागोदीरणावसरः। तत्र चेमेऽर्थाधिकाराः, तद्यथा—संज्ञा, शुभाशुभप्ररूपणा, विपाकप्ररूपणा, प्रत्ययप्ररूपणा, साद्यनादिप्ररूपणा, स्वामित्वप्ररूपणा चेति। तत्र संज्ञाशुभाशुभविपाकसूचनार्थमाह—'अणुभाग'त्ति। अनुभागोदीरणायां संज्ञा शुभाशुभा विपाकाश्च यथा शतकाख्ये ग्रन्थेऽनुभागबन्धाभिधानावसरे भणितास्तथाऽत्रापि द्रष्टव्याः। तत्र संज्ञा द्विभेदा—स्थानसंज्ञा, घातिसंज्ञा च। स्थानसंज्ञा चतुर्विधा—एकस्थानको द्विस्थानकस्त्रिस्थानकश्चतुःस्थानकश्च। घातिसंज्ञा त्रिप्रकारा, तद्यथा—सर्वघाती देशघाती अघाती च। तथा शुभकर्मणामनुभागः क्षीरखण्डोपमः, अशुभकर्मणां त्वशुभो घोषातकीनिंबरसोपमः। एषा च स्थानसंज्ञा घातिसंज्ञा शुभाशुभप्ररूपणा च प्रागनुभागसंक्रमाभिधानावसरे सप्रपञ्चं कृतेति न भूयो वितन्यते। विपाकश्चतुर्विधः, तद्यथा—पुद्गलविपाकः, क्षेत्रविपाकः, भवविपाको, जीवविपाकश्च। तत्र पुद्गलानधिकृत्य यस्य रसस्य विपाकोदयः स पुद्गलविपाकः। स च संस्थानषट्कसंहननषट्कातपशरीरपञ्चकाङ्गोपाङ्गत्रयोद्योतनिर्माणस्थिरास्थिरवर्णादिचतुष्कागुरुलघुशुभाशुभपराघातोपघातप्रत्येकसाधारणनाम्नां षट्त्रिंशत्प्रकृतीनामवगन्तव्यः। तथाहि—संस्थाननामादीनि औदारिकादिपुद्गलानेवाधिकृत्य स्वविपाकमुपदर्शयन्ति, तत आसां रसः पुद्गलविपाक एव। नन्वनया युक्त्या रत्यरत्योरपि रसः पुद्गलविपाक एव प्राप्नोति, तथाहि—कंटकादिस्पर्शादरतेर्विपाकोदयो भवति, स्रक्चन्दनादिसंस्पर्शाच्च रतेः, ततः कथं स नोक्तः? उच्यते—रत्यरतिविपाकस्य पुद्गलव्यभिचारात्, तथाहि—कंटकादिसंस्पर्शव्यतिरेकेऽपि प्रियाप्रियस्मरणादिना कदाचिद्रत्यरत्योर्विपाकोदयो दृश्यते, ततोऽनयोरनुभागो जीवविपाक एव युक्तः, न पुद्गलविपाकः। एवं क्रोधादिविपाकोऽपि भावनीयः। उक्तं च—"अरइरईणं उदओ किन्न भवे पोग्गलानि संपप्प। अप्पुट्ठेहि वि किन्नो एवं कोहा-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

इयाणं पि" ॥ अस्याश्चाक्षरगमनिका—अरतिरत्योरुदयो विपाकोदयः पुद्गलान् प्राप्य किं न भवति ? भवत्येवेति भावः, ततः कथं तयो रसः पुद्गलविपाको नोच्यते ? अत्राचार्यः काक्वा प्रत्युत्तरमाह—'अप्पुट्ठेहि वि किन्नो' ? अत्र सप्तम्यर्थे तृतीया, ततोऽयमर्थः—अस्पृष्टेष्वपि पुद्गलेषु किं तयो रत्यरत्योर्विपाकोदयो न भवति ? भवत्येवेति भावः। ततः पुद्गलव्यभिचारान्न तयो रसः पुद्गलविपाको भवति, किं तु जीवविपाक एव। एवं क्रोधादीनामपि वाच्यम्। तथा क्षेत्रमधिकृत्य यस्य रसस्य विपाकोदयः स रसः क्षेत्रविपाकः, स च चतसृणामानुपूर्वीणामवगन्तव्यः। तथा भवमधिकृत्य यस्य रसस्य विपाकोदयः स रसो भवविपाकः। स च चतुर्णामायुषामवसेयः। अथोच्येत गतीनामपि भवमधिकृत्य विपाकोदयो वर्तते, ततः कथं तासां रसो भवविपाको नाभिधीयते ? तदयुक्तं, व्यभिचारात्। तथाहि—आयुषां स्वभवमन्तरेण परभवे संक्रमेणाप्युदयो न भवति, ततः सर्वथा स्वभवाव्यभिचारात्तानि भवविपाकान्युच्यन्ते। गतीनां पुनः परभवेऽपि संक्रमेणोदयो भवति, ततः स्वभवव्यभिचारान्न ता भवविपाकिन्यः। उक्तं च—"आउव्व भवविवागा गई न आउस्स परभवे जम्हा। नो सव्वहा वि उदओ गईण पुण संकमेणत्थि" ॥ सुगमा। शेषाणां त्वष्टसप्ततिसंख्यानां प्रकृतीनां जीवविपाको रसः, जीवमेवाधिकृत्य विपाको यस्यासौ जीवविपाकः। 'नाणत्तं'इत्यादि—नानात्वं विशेषः, यत्तत्र शतकाख्ये ग्रन्थेऽनुभागबन्धे नोक्तं तदिह वक्ष्ये, उक्तस्य च विशेषमित्यर्थः। तथा तत्र बन्धमाश्रित्यान्ये एव मिथ्यात्वादयः प्रत्यया उक्ताः, इह तूदीरणामाश्रित्यान्ये एवेमे वक्ष्यमाणा ज्ञातव्याः ॥४३॥

(उ०)—तदेवमुक्ता स्थित्युदीरणा, सम्प्रत्यनुभागोदीरणावसरः। तत्र चेमेऽर्थाधिकाराः—संज्ञाप्ररूपणा, शुभाशुभप्ररूपणा, विपाकप्ररूपणा, प्रत्ययप्ररूपणा, साद्यनादिप्ररूपणा, स्वामित्वप्ररूपणा चेति। तत्र संज्ञाशुभाशुभविपाकप्ररूपणां ग्रन्थान्तरोक्त्याऽतिदिशन्नाह— ॥६४॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुभागोदीरणायां संज्ञा शुभाशुभा विपाकाश्च यथा शतकग्रन्थेऽनुभागबन्धाभिधानावसरे भणितास्तथाऽत्रापि द्रष्टव्याः। अयं चार्थः पीठिकायामुक्तप्रायः। नानात्वं–विशेषो यत्तत्र शतकाख्यग्रन्थेऽनुभागबन्धे नोक्तं तदिह वक्ष्ये। तथा तत्र बन्धमाश्रित्यान्ये एव मिथ्यात्वादयः प्रत्यया उक्ताः, इह तूदीरणामाश्रित्यान्ये एवेमे वक्ष्यमाणा ज्ञातव्याः ॥४३॥

इसे णाणत्तणिरूवणत्थं भण्णति—

मीसं दुट्ठाणिय सव्वघाइ दुट्ठाणएगठाणे य। सम्मत्तमंतरायं च देसघाई अचक्खू य ॥४४॥

(चू०)—'मीसं दुट्ठाणिय सव्वघाति'त्ति। सम्मामिच्छत्तं ट्ठाणसण्णं पडुच्च दुठाणियं, घातिसण्णं पडुच्च सव्वघाती। 'दुठाणएगठाणे य सम्मत्तमंतरायं च देसघाती अचक्खू य'त्ति–सम्मत्तं ट्ठाणं पडुच्च उक्कोस्सयं दुट्ठाणियं जहण्णयं एगट्ठाणियं, घातिसण्णाए देसघाति। एए वेऽवि सम्मत्तसम्मामिच्छत्ता तहिं ण भणिया इहं भणिया। पंच अंतराइया अचक्खूदंसणं च ठाणसण्णाए उक्कोसा दुट्ठाणिया, अणुक्कोसा दुट्ठाणिया एगट्ठाणिया वा, घातीसण्णाए उक्कोसा वा देसघाती। बन्धे एगट्ठाण बिट्ठाण तिट्ठाण चउट्ठाणा वि भणिया ॥४४॥

(मलय०)—तत्र नानाप्ररूपणार्थमाह–'मीसं'ति। सम्यग्मिथ्यात्वं स्थानसंज्ञामधिकृत्य द्विस्थानकं–द्विस्थानकरसोपतं, घातिसंज्ञामधिकृत्य सर्वघाति, सम्यक्त्वं पुनरुत्कृष्टोदीरणामधिकृत्य द्विस्थानकरसे, जघन्योदीरणां त्वधिकृत्यैकस्थानके, घातिसंज्ञामधिकृत्य च देशघाति वेदितव्यम्। एतच्च तत्र सर्वथा नोक्तं, किं त्विहैव। यतस्तत्रानुभागबन्धमाश्रित्य शुभाशुभप्ररूपणा कृता। न च सम्यक्त्वसम्यग्मिथ्यात्वयोर्बन्धः संभवति, तत एतद्वर्जा एव तत्राशुभप्रकृतयो निर्दिष्टाः। उदीरणा त्वेतयोरपि भवति। तत इह विशेषेणैतयोरुपादानम्।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तथाऽन्तरायं पञ्चप्रकारमुत्कृष्टामनुभागोदीरणामधिकृत्य द्विस्थानके एकस्थानके च, घातिसंज्ञामधिकृत्य देशघाति वेदितव्यम्। बन्धं प्रतीत्य पुनश्चतुष्प्रकारेऽपि रसे । तद्यथा–चतुःस्थानके, त्रिस्थानके, द्विस्थानके, एकस्थानके च। अचक्षुर्दर्शनं घातिसंज्ञामधिकृत्य देशघाति ॥ ४४ ॥

(उ०)—मिश्रं–सम्यग्मिथ्यात्वं स्थानसंज्ञामधिकृत्य द्विस्थानकरसोपेतं, घातिसंज्ञामधिकृत्य सर्वघाति, सम्यक्त्वं पुनरुत्कृष्टोदीरणामधिकृत्य द्विस्थानकरसे, जघन्योदीरणां त्वधिकृत्यैकस्थानके, घातिसंज्ञामधिकृत्य च देशघाति वेदितव्यम्। एतच्च तत्र सर्वथा नोक्तं, यतस्तत्रानुभागबन्धमाश्रित्य शुभाशुभप्ररूपणा कृता, न च सम्यक्त्वसम्यग्मिथ्यात्वयोर्बन्धः संभवति, तत एतद्वर्जिता एवाशुभप्रकृतयस्तत्रोक्ताः। उदीरणा त्वेतयोरपि भवतीतीह तयोर्विशेषेणोपादानम्। तथाऽन्तरायं पञ्चप्रकारं अचक्षुर्दर्शनं चोत्कृष्टामनुभागोदीरणामधिकृत्य सर्वोत्कृष्टे द्विस्थानकरसे, जघन्यां त्वधिकृत्यैकस्थानके द्विस्थानके च कस्मिँश्चिद्, घातिसंज्ञामधिकृत्य च देशघाति वेदितव्यम्, बन्धं प्रतीत्य त्वेकद्वित्रिचतुःस्थानकभेदाच्चतुष्प्रकारेऽपि रसे प्राप्यते ॥४४॥

ठाणेसु चउसु अपुमं दुठाणे कक्कडं च गुरुकं च। अणुपुव्वीओ तीसं नरतिरिएगंतजोग्गा य ॥४५॥

(चू०)—ठाणेसु चउसु अपुमंति–णपुंसगवेओ बन्धं पडुच्च तिविहो–चउट्ठाणीओ, तिट्ठाणीओ, बिठाणीओ य। उदीरणं पडुच्च उक्कोसिया अणुभागुदीरणा चउट्ठाणिया, अणुक्कसा चउट्ठाणिया, तिट्ठाणिया, बिट्ठाणिया, एगट्ठाणिया वि। 'दुट्ठाणे कक्कडं च गुरुकं च'त्ति–खड्डुगुरुयणामा बन्धे तिविहा–४–३–२। उदीरणं पडुच्च उक्कोसो वा अणुक्कोसो वा अणुभागो दुठाणिगो। 'अणुपुव्वीउ तीसं णरतिरिएगंतजोग्गा य'त्ति–चत्तारि आणुपुव्वीउ, ॥६५॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

मणुयतिरियाणमेया एगंतजोग्गातो तीसं पगतीतो--मणुयाउगं तिरियाउगं मणुयगति तिरियगति चत्तारि जातीतो उरालियसत्तगं मज्झिल्ला चत्तारि संठाणा छ संघयणा आतावं थावरं सहुमं अपज्जत्तगं साहारणमिति, एतासिं सव्वासिं बन्धे तिण्णि ट्ठाणा ४-३-२, उदीरणाए उक्कोसो वा अणुभागो दुठाणितो ॥४५॥

(मलय०)—'ठाणेसु' त्ति—नपुंसकवेदो बन्धं प्रतीत्य त्रिप्रकारे रसे। तद्यथा—चतुःस्थानके, त्रिस्थानके, द्विस्थानके, च। अत्र तूत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानके, अनुत्कृष्टां त्वधिकृत्य चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके च। ननु बन्धाभावे कथमुदीरणायामेकस्थानको रसो नपुंसकवेदस्य प्राप्यते? उच्यते—क्षपणकाले रसघातं कुर्वतस्तस्यैकस्थानकस्यापि रससंभवात्। तथा कर्कशनाम गुरुनाम च बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च। इह त्वनुभागोदीरणामधिकृत्य द्विस्थानके। तथा चतस्र आनुपूर्व्यो याश्च नरतिरश्चामुदयं प्रत्येकान्तयोग्यास्त्रिंशत्प्रकृतयः, तद्यथा—मनुष्यायुस्तिर्यगायुस्तिर्यग्गतिर्मनुष्यगतिरेकेन्द्रियजातिर्द्वीन्द्रियजातिस्त्रीन्द्रियजातिश्चतुरिन्द्रियजातिश्चौदारिकसप्तकमाद्यन्तवर्जसंस्थानचतुष्टयं संहननषट्कमातपं स्थावरं सूक्ष्ममपर्याप्तं साधारणं चेति ता अपि बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च। इह त्वनुभागोदीरणामुत्कृष्टामनुत्कृष्टां वाऽधिकृत्य द्विस्थानके रसे वेदितव्याः ॥ ४५ ॥

(उ०)—अपुमान्—नपुंसकवेदोऽनुभागोदीरणायामेकद्वित्रिचतुःस्थानकरूपेषु चतुर्ष्वपि स्थानेषु ज्ञेयः। तत्रोत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानके, अनुत्कृष्टां त्वधिकृत्य चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके च ज्ञेयः। बन्धं प्रतीत्य पुनरयमेकस्थानकवर्जे त्रिप्रकारे रसे प्रोक्तः। अथ बन्धाभावे नपुंसकवेदस्यैकस्थानको रसः कथमुदीरणायां प्राप्यते? उच्यते—क्षपणकाले रसघातं कुर्वतस्तस्यै-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

कस्थानकस्यापि रसस्य संभवात् । तथा कर्कशनाम गुरुनाम च बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च प्राप्यते, इह त्वनुभागोदीरणायां द्विस्थानके । तथाऽऽनुपूर्व्यश्चतस्रोऽपि, नरतिरश्चामुदयं प्रत्येकान्तयोग्याश्च त्रिंशत्प्रकृतयस्तिर्यग्द्विकनरद्विकाद्यजातिचतुष्टयौदारिकसप्तकमध्यमसंस्थानचतुष्कसंहननपट्कातपस्थावरसूक्ष्मापर्याप्तसाधारणलक्षणा बन्धं प्रत्येकस्थानकवर्जत्रिप्रकारे रसे प्राप्यमाणा अप्युत्कृष्टामनुत्कृष्टां चोदीरणामधिकृत्येह द्विस्थानक एव रसे ज्ञेयाः ॥४५॥

वेया एगट्ठाणे दुट्ठाणे वा अचक्खुचक्खू य । जस्सऽत्थि एगमवि अक्खरं तु तस्सेगठाणाणि ॥४६॥

(चू०)—'वेया एगट्ठाणे दुट्ठाणे वा' इत्थिवेदपुरिसवेयाणं इत्थिवेदस्स बंधे तिन्नि ट्ठाणा ४–३–२, पुरिसवेयगस्स बन्धे चत्तारि ठाणा ४-३-२-१ । उदीरणा दोण्ह वि उक्कोसा दुठाणिया, अणुक्कोसा एगठाणिया वा दुठाणिया वा अणुभागुदीरणा । 'अचक्खुचक्खु य'त्ति-एतेसिं बन्धे चत्तारि ट्ठाणा ४-३-२-१, उदीरणाए पुरिसवेदसरिसा । 'देसघाती अचक्खुय'त्ति पुव्वं भणियं, पुणो अचक्खुग्गहणं किमत्थं? भण्णति-ठाणणियमणत्थं । 'जस्सत्थि एगमवि अक्खरं तु तस्सेगट्ठाणाणि' त्ति-जस्स जीवस्स एक्कंपि अक्खरविण्णाणं अत्थि तस्स णियमा एगट्ठाणिया अणुभागुदीरणा होति । अण्णे भणंति -एगमवि अक्खरं जो सव्वपज्जवेहिं जाणइ तस्स एगट्ठाणिया उदीरणा आभिणिबोहियसुयणाणओहिणाणावरणओहिदंसणावरणाणं । चउण्हं संजलणाणं जहा बंधे ४-३-२-१ तहा उदीरणा एवं चेव ४-३-२-१ ॥

(मलय०)—'वेय' त्ति–वेदौ–स्त्रीवेदपुरुषवेदौ अनुभागोदीरणामुत्कृष्टामधिकृत्य द्विस्थानके, अनुत्कृष्टां त्वधिकृत्य द्विस्थानके एक-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

र्तते तथा मनःपर्यायज्ञानावरणस्यापि द्रष्टव्या। तत्रोत्कृष्टा चतुःस्थाने, अनुत्कृष्टा तु चतुःस्थानके त्रिस्थानके द्विस्थानके वा। बन्धे तु मनःपर्यायज्ञानावरणस्य चतुष्प्रकारोऽपि रसो भवति, शेषकर्मणां त्वेकस्थानकं विना त्रिप्रकारः। तानि च शेषकर्माण्यमूनि—केवलज्ञानावरणं केवलदर्शनावरणं निद्रापञ्चकं सातासातवेदनीये मिथ्यात्वं द्वादश कषाया षड् नोकषायाः नरकगत्यानुपूर्वी देवगत्यानुपूर्वी पञ्चेन्द्रियजातिस्तैजससप्तकं वैक्रियसप्तकमाहारकसप्तकमाद्यान्त्यसंस्थाने वर्णपञ्चकं गन्धद्विकं रसपञ्चकं स्निग्धरूक्षमृदुलघुशीतोष्णरूपं स्पर्शषट्कमगुरुलघूपघातं पराघातं उच्छ्वासोद्योतविहायोगतिद्विकानि त्रसचतुष्कं स्थिरादिषट्कमस्थिरादिषट्कं निर्माणं तीर्थकरं गोत्रद्विकं चेति। एतासां चैकोत्तरशतसङ्ख्यानां शेषकर्मप्रकृतीनामुत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानको रसोऽनुत्कृष्टां त्वधिकृत्य चतुःस्थानकस्त्रिस्थानको द्विस्थानकश्च। तथा मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणसंज्वलनचतुष्टयनोकषायनवकानामुत्कृष्टानुभागोदीरणामधिकृत्य रसः सर्वघाती, अनुत्कृष्टां त्वधिकृत्य देशघाती सर्वघाती च। उक्तं च—"[1]देसोवघाइयाणं उदये देसो व होइ सव्वो वा। देसोवघाइओ च्चिय अचक्खुसम्मत्तविग्घाणं" ॥ अत्रोदय इत्यसंप्राप्त्युदये उदीरणायामित्यर्थः। तथा केवलज्ञानावरणकेवलदर्शनावरणनिद्रापञ्चकमिथ्यात्वद्वादशकषायाणामुत्कृष्टामनुत्कृष्टां वाऽनुभागोदीरणामधिकृत्य रसः सर्वघात्येव। सातासातवेदनीयायुश्चतुष्टयसकलनामप्रकृतिगोत्रद्विकानामुत्कृष्टामनुत्कृष्टां वोदीरणामधिकृत्य रसः सर्वघातिप्रतिभागः। शुभाशुभत्वे विशेषमाह—मिश्रं-सम्यग्मिथ्यात्वं सम्यक्त्वमपि चानुभागोदीरणामधिकृत्य पापेषु—पापकर्मस्वधिगन्तव्यम्। अनयोर्घातिकर्मतया रसस्याशुभत्वात्। शेषप्रकृतयस्तु यथा शतकग्रन्थेऽनुभागबन्धे शुभाशुभतयाऽभिहितास्तथाऽत्रापि वक्तव्याः। अथ कीदृशेऽनुभागसत्कर्मणि वर्तमाने उत्कृष्टानुभा-

१ पञ्चसंग्रहउदीरणाकरण गा० ४२

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

गोदीरणां करोतीत्युच्यते–अनुभागसत्कर्मणः षट्स्थानपतितहीनादप्युत्कृष्टाऽनुभागोदीरणा प्रवर्तते । इदमुक्तं भवति–यत्सर्वोत्कृष्टमनुभागसत्कर्म तस्मिन्ननन्तभागहीने वाऽसंख्येयभागहीने वा संख्येयभागहीने वा संख्येयगुणहीने वाऽसंख्येयगुणहीने वाऽनन्तगुणहीने वोत्कृष्टानुभागोदीरणा प्रवर्तते । यतोऽनन्तानन्तानां स्पर्धकानामनुभागे क्षपितेऽप्यनन्तानन्तान्युत्कृष्टरसानि पश्चादवतिष्ठन्ते, ततो मूलानुभागसत्कर्मापेक्षयाऽनन्तगुणहीनेऽनन्तभागेऽपि शेषे सति यद्युत्कृष्टानुभागोदीरणा लभ्यते तदा किं वाच्यमसंख्येयगुणहीनादावनुभागसत्कर्मणि सतीति ॥४७॥

इयाणिं विवागे विसेसो भण्णइ—

विरियंतरायकेवलदंसणमोहणियणाणवरणाणं । असमत्तपज्जएसु य सव्वद्दव्वेसु उ विवागो ॥४८॥

(चू०)—वीरियंतराय केवलदंसणावरण अट्ठावीसाए मोहपगतीणं पंचण्हं णाणावरणियाणं एयासिं पणतीसाए पगतीणं 'असमत्तपज्जएसु य सव्वदव्वेसु तु विवागो'त्ति–जीवदव्वे विवागो दव्वतो ताव सव्वं जीवदव्वं आवरियं, भावउ वीरियाइ पज्जवा जीवस्स ण सव्वपज्जवा वीरियंतरायादीहिं पणतीसाए कम्मेहिं आवरिया, जहा–'सुट्ठुवि मेहसमुदए होइ पहा चंदसूराणं'। विवागोत्ति फलं–उदयो ॥४८॥

(मलय०)—सम्प्रति विपाके विशेषमाह—वीर्यान्तरायकेवलदर्शनावरणाष्टाविंशतिविधमोहनीयपञ्चविधज्ञानावरणानां पञ्चत्रिंशत्प्रकृतीनां असमस्तपर्यायेषु सर्वद्रव्येषु–सर्वजीवद्रव्येषु विपाकः । तथाहि–इमा वीर्यान्तरायादयः पञ्चत्रिंशत्प्रकृतयो द्रव्यतः सकलमपि जीवद्रव्यमुपघ्नन्ति, पर्यायांस्तु न सर्वानपि । यथा मेघैरतिनिचिततरैरपि सर्वात्मनान्तरितयोरपि सूर्याचन्द्रमसोर्न तत्प्रभा सर्वथाऽप-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

नेतुं शक्यते। उक्तं च–'सुट्ठु वि मेहसमुदए होइ पहा चंदसूराणं' ति, तथाऽत्रापि भावनीयम् ॥४८॥

(उ०)—अथ विपाके विशेषमाह–वीर्यान्तरायकेवलदर्शनावरणाष्टाविंशतिविधमोहनीयपञ्चविधज्ञानावरणानां सर्वसंख्यया पञ्चत्रिंशत्प्रकृतीनामसमस्तपर्यायेषु सर्वद्रव्येषु–सर्वजीवद्रव्येषु विपाकः। तथाहि इमा वीर्यान्तरायाद्याः पञ्चत्रिंशत्प्रकृतयः सकलमपि जीवद्रव्यमुपघ्नन्ति पर्यायांस्तु न सर्वानपि, यथा मेघैः सर्वात्मनाऽऽच्छादितयोरपि सूर्याचन्द्रमसोस्तत्प्रभा सर्वथा नापनेतुं शक्यते तथैताभिः सर्वात्मनाऽऽवृतेऽपि जीवद्रव्ये तत्पर्यायाः सर्वथा नापनेतुं शक्यन्त इति भावनीयम् ॥४८॥

गुरुलघुगाऽणंतपएसिएसु चक्खुस्स रूविदव्वेसु। ओहिस्स गहणधारणजोग्गे सेसंतरायाणं ॥४९॥

(चू०)—'गुरुलहुगाणंतपदेसिकेसु'त्ति। चक्खुस्स जे गुरुलहुगा अणंतपदेसिया खंधा तेसु चक्खुदंसणस्स विवागो, न सेसेसु दव्वेसु। 'रूविदव्वेसु ओहिस्स'त्ति–सव्वरूविदव्वेसु ओहिदंसणस्स विवागो ण सव्वदव्वेसु। 'गहणधारणजोग्गे सेसंतरायाणं' जे गहणधारणजोग्गा पोग्गलदव्वा तेसु दाणलाभभोगपरिभोगांतराइयाणं विवागो, ण सेसदव्वेसु। अवसेसाणं कम्माणं जहा बंधसतगे तहा चेव। विवाग विसेसो भणिओ ॥४९॥

(मलय०)—'चक्षुषः'–चक्षुर्दर्शनावरणस्य ये गुरुलघुका अनन्तप्रादेशिकाः स्कन्धास्तेषु विपाकः। अवधिदर्शनावरणस्य रूपिद्रव्येषु। शेषान्तरायाणां दानलाभभोगोपभोगान्तरायाणां ग्रहणधारणयोग्येषु पुद्गलद्रव्येषु विपाको न शेषेषु। यावत्येव हि विषये चक्षुर्दर्शनादीनि व्याप्रियन्ते तावत्येव विषये चक्षुर्दर्शनावरणादीन्यपि। तत उक्तरूपो विषयनियमो न विरुध्येत। शेषप्रकृतीनां तु यथा प्राक् विपाकोऽभिहितः पुद्गलविपाकादिस्तथैवावगन्तव्यः ॥४९॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(उ०)—चक्षुषः—चक्षुर्दर्शनावरणस्य गुरुलघुकेष्वनन्तप्रादेशिकेषु स्कन्धेषु विपाकः। अवधिदर्शनावरणस्य रूपिद्रव्येषु। शेषान्तरायाणां—वीर्यान्तरायव्यतिरिक्तानां दानलाभभोगोपभोगान्तरायाणां ग्रहणधारणयोग्येषु पुद्गलद्रव्येषु विपाको न शेषेषु। यावानेव हि चक्षुर्दर्शनादीनां विषयस्तावानेव तदुपघातककर्मणामित्युक्तरूपविषयनियमाविरोधः। शेषप्रकृतीनां तु पुद्गलविपाकादिर्यथा प्रागभिहितस्तथैवावगन्तव्यः ॥४९॥

इदाणिं पच्चयपरूवणा भण्णइ। सा दुविहा—गुणपच्चइया य, भवपच्चइया य। गुणकारणेण जा अणुभागुदीरणा जहा आहारसत्तगस्स सा गुणपच्चइया, भवपच्चइया नाम जहा णिरयभवं पडुच्च णिरयाउगस्स अणुभागुदीरणा सा भवपच्चइगा वुच्चइ, एवमादि—

वेउव्वियतेयगकम्मवन्नरसगंधनिद्धलुखाओ। सीउण्हथिरसुभेयरअगुरुलघुगो य नरतिरीए ॥५०॥

(चू०)—वेउव्वियसत्तगं तेयगकम्मग्गहणेणं तेजइगसत्तगं गहियं, वण्णा पंच, गंधा दोण्णि, रसा य पंच, णिद्धलुक्खसीयउण्हथिराथिरसुभासुभ अगुरुलहुगं एताउ पणतीसं पगइउ तिरियमणुयाणं परिणामपच्चइगा॥

(मलय०)—सम्प्रति प्रत्ययप्ररूपणा कर्तव्या। प्रत्ययोऽपि द्विधा—परिणामप्रत्ययो भवप्रत्ययश्च। तत्र परिणामप्रत्ययमधिकृत्याह—'वेउव्विय'त्ति। वैक्रियसप्तकं, तैजसकार्मणग्रहणात्तैजससप्तकं गृहीतम्, तथा वर्णपञ्चकं गन्धद्विकं रसपञ्चकं स्निग्धरूक्षशीतोष्णस्थिरास्थिरशुभाशुभागुरुलघूनि चानुभागोदीरणामधिकृत्य तिर्यङ्मनुष्याणां परिणामप्रत्ययानि। वैक्रियसप्तकं हि तिर्यङ्मनुष्याणां गुणविशेषसमुत्थलब्धिप्रत्ययं ततस्तदुदीरणापि तेषां गुणपरिणामप्रत्यया। तैजससप्तकादयस्तु तिर्यङ्मनुष्यैरन्यथान्यथा परिणमय्योदीर्यन्ते, ॥७०॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi